# Shrichakra Varnanam

# શ્રીચક્રવર્ણનમ્

## Document Information

Text title : Shrichakra Varnanam

File name : shrIchakravarNanam.itx

Category : devii, shivarahasya, devI

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 16 ||

Latest update : September 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીચક્રવર્ણનમ્

મુનયઃ -
કથં દેવ્યા તારકારે પુરં શ્રીપુરનામકમ્ ।
કલ્પિતં શ્રીમહેશાજ્ઞાવશતસ્તદદાદ્ય નઃ ॥ ૧॥

સ્કન્દઃ -
યથા દેવ્યા નિર્મિતઞ્ચ શ્રીપુરં શ્રૃણુત દ્વિજાઃ ।
કામેશેન દ્વિજેનૈવ (શિવેનૈવ) સા પ્રોક્તા પરમેશ્વરી ॥ ૨॥

લલિતા શ્રીમહાદેવી સૈવ ત્રિપુરસુન્દરી ।
મનસા ચિન્તયામાસ પુરં તત્ર મનોરમમ્ ॥ ૩॥

મણિપ્રાકારશતકૈર્ભૂધરાકારગોપુરૈઃ ।
મણિમાણિક્યખચિત નવરત્નોરુકાન્તિભિઃ ॥ ૪॥

પ્રફુલ્લસુમનામોદિરત્નવૃક્ષવનાવૃતમ્ ।
કલ્પવાટીપરિવૃતનીપોદ્યાનવિરાજિતમ્ ॥ ૫॥

સુધાસિન્ધુતરઙ્ગૌઘરમ્યપર્યન્તમારુતમ્ ।
નવરત્નાગારસૌધકુમ્ભોદ્યત્કાન્તિકાન્તિતમ્ ॥ ૬॥

દિવ્યમુક્તાવલીક્લૃપ્તસરાવલિ(વલ્ય)વિભૂષિતૈઃ(વિભૂષિતમ્) ।
ગોમેદપુષ્પરાગોદ્યત્પ્રવાલમણિતોરણૈઃ ॥ ૭॥

હીરજાલકસઞ્છન્નકુમ્ભવમૌલિવિરાજિતૈઃ ।
સૌધપઙ્ક્તિસમુત્સેધવિશાલાયુતશસ્તદા ॥ ૮॥

મણિમાણિક્યખચિતનવરત્નવિચિત્રિતૈઃ ।
ધૂપિતૈસ્તગરામોદ(પાર)પાટીરોશીરચન્દનૈઃ ॥ ૯॥

પુરદ્વારૈર્ધવલિતગવાક્ષવલભીયુતૈઃ ।
મણ્ટપાવલિસઞ્છન્નમૌલિપાલિતતદ્યુતિઃ ॥ ૧૦॥

મણિરોચિચિતાદર્શ કુટ્ટિમોદ્યત્કવાટકૈઃ ।
પ્રાક્પશ્ચાદુત્તરે ચૈવ દક્ષિણે પૂર્વતઃ ક્રમાત્ ॥ ૧૧॥

મણિગોપુરમૌલિસ્થહીરોદ્યત્કલશપ્રભૈઃ ।
તિરસ્કારિતચન્દ્રાર્કૈઃ પ્રાકારૈર્મણિકલ્પિતૈઃ ॥ ૧૨॥

નિયુતાયુતગોદ્ભાસિસમુચ્છ્રાયોરુમણ્ડલેઃ ।
ગોમેદપુષ્પરાગેન્દ્રનીલવૈડૂર્યહીરજૈઃ ॥ ૧૩॥

મુક્તાવિદ્રુમરક્તાચ્છતતિકાન્તિવિરાજિતૈઃ ।
ગરુડોદ્ગારરત્નાનાં મણ્ટપાવલિશોભિતૈઃ ॥ ૧૪॥

હીરસૌધમણિ(સૌધૈર્મણિ)પ્રોદ્યદ્વાતાયનગવાક્ષકૈઃ ।
દેવીવિહારસદનૈર્મદનાન્તકરસ્ય ચ ॥ ૧૫॥

પર્યન્તરત્નમાલાદિછન્નમૌલિવિરાજિતૈઃ ।
ચન્દ્રોપલમહાસૌધૈશ્ચન્દ્રાસારૈકનિર્ઝરૈઃ ॥ ૧૬॥

રમ્યાદર્શમહાસૌધૈ રત્નપુષ્પવિરાજિતૈઃ ।
યાલી(પાળી)પાલીચિતાનેકમયૂરવરહંસકૈઃ ॥ ૧૭॥

ગજસૌધૈર્હંસસૌધૈસ્સિહ્મસૌધૈશ્ચ ભાસ્વરૈઃ ।
તુરઙ્ગરથસૌધેશ્ચ શાર્દૂલોત્તમસૌધકૈઃ ॥ ૧૮॥

તત્તત્પ્રાકારાન્તરાલે શ્રીદેવ્યા મનસાઽઽતતૈઃ (મનસા તતૈઃ) ।
સુરત્નતરવસ્તત્ર મણિ(મહા)પુષ્પકલા(ફલા)વૃતાઃ ॥ ૧૯॥

ચન્દનાનાં ચ વિપિનૈર્નયનાનન્દદાયકૈઃ ।
કલ્પવૃક્ષોરુવિપિનૈર્નીપોપવનસુન્દરૈઃ ॥ ૨૦॥

કદમ્બવનરાજીભિ(ભી) રાજદ્રાજીવવાપિકાઃ(કૈઃ) ।
તત્પ્રાન્તમધ્યસૌધૈશ્ચ નવરત્નવિચિત્રિતૈઃ ॥ ૨૧॥

ધારાસારગૃહૈશ્ચૈવ ભ્રમદ્રથગૃહૈસ્તથા ।
મન્દારપારિજાતોત્થવનવાયુસુગન્ધિતૈઃ ॥ ૨૨॥

પ્રત્યગ્રકેતકોદ્ભાસિચમ્પકોદ્દામસૌરભૈઃ ।
કુરવાશોકવકુલરસાલમધુકૈર્ધવૈઃ ॥ ૨૩॥

ખર્જૂરપૂગનારેલનાગપુન્નાગલોધ્રકૈઃ ।
તક્કોલાઙ્કોલહિન્તાલમણિરમ્ભાકપિત્થકૈઃ ॥ ૨૪॥

તગરાગરુકેદારરદેવદારુમધૂકકૈઃ ।
ચિર(ચિરિ)બિલ્વૈશ્ચ બિલ્વૈશ્ચ મધૂકામ્રાતકૈર્ધરુવૈઃ ॥ ૨૫॥

વલ્લયસ્તત્રરાજન્તિ(ન્તે) દ્રાક્ષે(ક્ષૈ)લાપિપ્પલીયુતાઃ ।
મરીચયઃ કુન્દવલ્યઃ (કુન્દમલ્યો) જાજીકાઃ ચન્દ્રિકાયુતાઃ ॥ ૨૬॥

તદ્રમ્યકુસુમામોદિસૌમ્યબન્ધુરમારુતઃ ।
હંસા મયૂરાશ્ચ પિકા કોકસારસપઙ્ક્તયઃ ॥ ૨૭॥

કાપોતશારિકારાવમૃગાશ્ચ ચમરીગણાઃ ।
કુરઙ્ગા હસ્તિનઃ કોલાઃ સઞ્ચરન્તિ વને મુદા ॥ ૨૮॥

નયનાનન્દ દં નિત્યં શ્રીપુરે મણિદ્વીપકે ।
પદ્મિન્યો વિવિધાસ્તત્ર રત્નસોપાનમણ્ડિતાઃ ॥ ૨૯॥

પ્રાન્તરત્નોધતમહામણ્ટપાવલિભાસુરાઃ ।
તત્ર દેવદ્રુમાપારવનરાજિવિરાજિતમ્ ॥ ૩૦॥

તત્પ્રાચ્યાં મણિસઙ્કૢપ્તં દણ્ડિનીધામ સુન્દરં (ઉત્તમમ્) ।
નાનારત્નમણિભ્રાજિસિન્ધુરૌઘવિરાજિતમ્ ॥ ૩૧॥

ભદ્રમન્દ્રૈર્ભદ્રમૃગૈશ્ચતુર્દન્તાલિશોભિતૈઃ ।
કટસ્રવન્મદભરૈઃ કુમ્ભોદ્યત્પાણ્ડરારુણૈઃ ॥ ૩૨॥

મણિગ્રૈવેયઘણ્ટાદિ કુથાઙ્કુશવિભૂષિતૈઃ ।
પૂર્વતો ભાતિ શૈલેન્દ્રનિભૈર્વારણસત્તમૈઃ ॥ ૩૩॥

દક્ષિણે તત્ર પ્રાકારો નવરત્નવિરાજિતઃ ।
મન્ત્રિણ્યાસ્તત્ર તદ્ધામ નવરત્નવિચિત્રિતમ્ ॥ ૩૪॥

ઉચ્ચૈઃશ્રવાધિકૈરશ્વૈર્નાનાવર્ણૈર્બલોત્કટૈઃ ।
કલ્માષિસ્તિત્તિરપ્રખ્યે રક્તકર્બુરશ્વેતકૈઃ ॥ ૩૫॥

નીલપીતકમાઞ્જિષ્ઠૈર્મયૂરસદૃશૈર્હયૈઃ ।
તત્રાશ્વકોટિભિર્યુક્તા મન્ત્રિણી સેવિતા તદા ॥ ૩૬॥

મન્ત્રિણ્યાઃ (મુદ્રિણ્યાઃ) પશ્ચિમે ધામ નવરત્નવિચિત્રિતમ્ ।
કુમ્ભોદ્યન્મણિકૢપ્તાક્ષચક્રજાલપતાકકૈઃ ॥ ૩૭॥

યુગન્ધરાક્ષફલકૈર્ઘોણાકર્બુરશોભિતૈઃ ।

રથૈશ્ચ કોટિભિસ્તત્ર શોભિતા મન્ત્રિણી (મુદ્રિણી) તદા ॥ ૩૮॥

વારાહ્યાશ્ચોત્તમં ધામ રત્નાવલિવિભૂષિતમ્ ।
સાપિ પ્રમુદિતા નિત્યં પાતિ તં યોગિનીગણૈઃ ॥ ૩૯॥

નવકોટિભિરત્યુગ્રાઃ પ્રાસા(પાશા)સિવરપાણિભિઃ ।
નિત્યાનામન્તરા સદ્મ પદ્મરાગમણીતતમ્ ॥ ૪૦॥

તતો હિ પરિતસ્તત્ર જ્વાલામાલિનિકા તતઃ ।
પ્રાકારો વહ્નિઽઽવીતઃ (વહ્નિનાવીતઃ) પર્યન્તજ્વાલશોભિતઃ ॥ ૪૧॥

અનિન્ધનો દહત્યેષસ્વશિખાલેહિ(ડિ)તામ્બરઃ ।
અહોરાત્રમવિશ્રાન્તો જ્વાલાવ્યાપ્તદિગમ્બરઃ ॥ ૪૨॥

માતરો વટુકાશ્ચૈવ ડાકિન્યો યોગિનીગણાઃ ।
યાન્તિ તત્રાન્તરે દેવ્યાઃ પ્રાકારાણાં શતાષ્ટકમ્ ॥ ૪૩॥

માર્તાણ્ડભૈરવશ્ચૈવ તથૈવાનન્દભૈરવઃ ।
પ્રમોદભૈરવશ્ચૈવ તથા વૈ મોદભૈરવઃ ॥ ૪૪॥

પ્રાચ્યાં પ્રતીચ્યાં તત્પાતિ (તત્પાન્તિ) દક્ષિણે ચ તથોત્તરે ।
સુધાકૂપાઃ સુધાવાપ્યો ઘૃતક્ષીરદધિસ્રવાઃ ॥ ૪૫॥

મધુસ્રવાસ્તથા નદ્યઃ પુટકે પુટકે મધુ ।
સુધાફલાસ્સદા વૃક્ષાશ્ચામ્લાનાનિ સુમાન્યપિ ॥ ૪૬॥
(સુધાફલા સદા વૃક્ષા અમ્લાનાનિ સુમાન્યપિ) ॥ ૪૬॥

યોજનાયુતગન્ધીનિ નેત્રાનન્દકરાણિ ચ ।
દ્વીપોઽયં કુમુદાકારસ્સુધાવાર્ધિ તરઙ્ગકૈઃ ॥ ૪૭॥

રઞ્જિતઃ પરિતો ભાતિ મણિસારકૈસુન્દરઃ ।
લક્ષદ્વયં લોસચનાનાં (યોજનાનાં) મનસા શિવનિર્મિતઃ ॥ ૪૮॥

તત્ર ચિન્તામણિતતે સૌધે પરમભાસ્વરે ।
કામેશ્વર્યા ચ કામેશસ્તત્ર નિત્યમુપાસતે ॥ ૪૯॥

નાનાભોગવિહારૈશ્ચ નિત્યાભિઃ પરિસેવિતઃ ।
બ્રહ્મવિષ્ણવીશ્વર સદાશિવરુદ્રોરુમઞ્ચકે ॥ ૫૦॥

નિષણ્ણઃ પરયા દેવ્યા કામેશઃ કામદાયકઃ ।
કામેશ્વર્યા સદૈવાસ્તે કામદાનૈકદીક્ષિતઃ ॥ ૫૧॥

કોટિકન્દર્પદર્પઘ્નઃ કપર્દેણાઙ્કુશોભિતઃ ।
સુરક્તપઙ્કજાકારવિગ્રહસ્સુન્દરાકૃતિઃ ॥ ૫૨॥

જપાસુમનિભાધિક્યકામેશ્યા કાન્તિવ(મ)ત્તયા ।
સેવિતો વિવિધૈર્ભોગૈર્નિત્યાભિઃ પરિસેવિતઃ ॥ ૫૩॥

(સ્કન્દઃ -)
પાથોજાતભવપ્રિયાકરમહાપઙ્કેરુહાધ્યાસિતા
પાણ્યોર્લોલધૃતાક્ષ (પાણિં લોલધૃતાક્ષ) ચામરગણૈસ્સંવીજિતા સા શિવા ।
નિત્યાભિઃ પરિસેવિતા પ્રમથપેનાધ્યાસ્ત મઞ્ચોત્તરં
સ્વસ્યારક્તનખાંશુનિર્ગતહરિબ્રહ્મેશલીલાયુતા ॥ ૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે શ્રીચક્રવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૧૬ ॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 16 ..

Proofread by Ruma Dewan

*Shrichakra Varnanam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*